[Palash Ghorai, "“ईशा वास्यमिदं सर्वम्” (ईश.१) इति मन्त्रस्य द्वैताद्वैतविशिष्टाद्वैतदर्शनदिशा अध्ययनम्," *Vyāsaśrīḥ* (UGC care listed Refereed Research Journal), Vol. XVII, Buddheswar Sarangi, Maharshi Vyasadev National Research Institute, Rourkela, Odisha: 2021, pp. 94-104]

# “ईशा वास्यमिदं सर्वम्” (ईश.१) इति मन्त्रस्य द्वैताद्वैतविशिष्टाद्वैतदर्शनदिशा अध्ययनम्

**पलाश-घोडइः**

प्राचीनाः नवीनाश्च नैके भाष्यकाराः ईशोपनिषन्मन्त्राणाम् अर्थनिर्णयाय भाष्यटीकादिकं प्रणीतवन्त इत्यस्मात् अस्या उपनिषदो मन्त्राणाम् अर्थगाम्भीर्यम् अनुमातुं शक्यते। शुक्लयजुर्वेदसंहितायाः चत्वारिंशदध्याये विद्यमानायाः ईशोपनिषदः मन्त्राणामुपदेशात्प्राक् शुक्लयजुर्वेदसंहितायां पुरुषमेध-सर्वमेध-पितृमेधादियज्ञानां विस्तृतं विवरणं दृश्यते, अर्थात् कर्मपराः मन्त्राः पूर्वम् उपदिष्टाः। अतो ये कर्मनिष्णाता मुमुक्षवः तेषां कृते ईशोपनिषन्मन्त्राणाम् उपदेश इति प्रायेण निश्चेतुं शक्यते। कर्मप्रतिपादकानां यज्ञानाम् वर्णनाद् अनन्तरम् ईशोपनिषद् आरभ्यते। तत्र प्रथममन्त्रो हि -

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥ १ ॥ इति।

भाष्यकारेषु आदिमतमस्य अद्वैतिनः शङ्कराचार्यस्य मते अयं हि मन्त्रः ज्ञाननिष्ठानां कृते उपदिश्यते। तन्मते मन्त्रस्यार्थो हि - “अहमेव इदं सर्वमिति परमार्थसत्यरूपेण अनृतमिदं सर्वं चराचरम् आच्छादनीयं स्वेन परमात्मना। यथा चन्दनागुर्वादेरुदकादिसम्बन्धज-क्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत्... सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्।”[1] अर्थात् इदं सर्वं वस्तुतः अधिष्ठानब्रह्मस्वरूपमिति ज्ञानेन अध्यस्तं मिथ्याभूतं सर्वं स्वत एव परित्यक्तं स्यात्। एवं परमार्थसत्यात्मभावनया नामरूपाख्यप्रपञ्चप्रविलापनरूपेण त्यागेन त्वं ज्ञाननिष्ठः सन्न्यासी भुञ्जीथाः पालयेथाः आत्मानं रक्षयेः। सर्वम् अध्यस्तम् अनृतम्, अधिष्ठानं ब्रह्मैव सत्यमिति विज्ञाय कुत्रचिद् मिथ्याविषयां गृधिम् आकाङ्क्षां न कुर्याः, कस्यापि धने लोभं मा कार्षीः इत्यर्थः।

विशिष्टाद्वैतिना रामानुजाचार्येण यद्यपि अस्या उपनिषदः भाष्यं न विरचितं तथापि तत्सिद्धान्तानुसारेण वेङ्कटनाथेन ईशोपनिषन्मन्त्राणां भाष्यं रचितम्। तन्मते ईशोपनिषद्धि शिष्यं प्रति गुरोः ब्रह्मविद्यानुशासनम्।[2] तद्भाष्यानुसारेण ईशोपनिषदः प्रथमस्य मन्त्रस्य आदिमपादद्वयेन सर्वस्य मुमुक्षोः जीवस्य ईश्वरपारतन्त्र्यं बोध्यते। ततः अन्तिमपादद्वयेन वैराग्यवृत्तिः उपदिश्यते।[3] तन्मते मन्त्रस्यार्थो हि - इदम् ईश्वरव्यतिरिक्तं चिदचिदात्मकं सर्वम्, ईशा “‘ज्ञाज्ञौ द्वावजावीशनीशा’-वित्यादिषु जीवादत्यन्तविलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेन”, वास्यं व्याप्यं, सर्वाधारे स्वस्मिन् स्वेन वसनीयं वा। जगत्यां लोकेषु, “जगत् स्वरूपतो धर्मतो वान्यथात्वं गच्छत् भोक्तृभोग्यरूपं वस्तुजातम्। अतदात्मकं किञ्चिदपि नास्ति”। “तेन जगता भोग्यताभ्रमविषयेण त्यक्तेन दोषभूयस्त्वदर्शनात् परित्यक्तेन” भुञ्जीथाः। अथवा सर्वावास्यत्वेन प्रकृतं निरतिशयभोग्यं ब्रह्म भुञ्जीथाः। अर्थात् कस्यापि बन्धोः अबन्धोर्वा धनं मा गृधः मा अभिकांक्षः। अयं च धनाशापरित्यागः परमात्मेतरकृत्स्नविषयेभ्यः मुमुक्षोः वैराग्यं लक्षयति।

द्वैतवेदान्तमूर्धन्यभूतेन मध्वाचार्येण ईशोपनिषदः प्रथममन्त्रस्य संक्षेपेण भाष्यरचनावसरे ईशावास्यमिति (ईश-आवास्यम्) पाठं स्वीकुर्वता उच्यते - “ईशस्यावासयोग्यमीशावास्यम्। जगत्यां प्रकृतौ। तेन ईशेन त्यक्तेन दत्तेन भुञ्जीथाः।”[4] ब्रह्माण्डपुराणम् उद्धृत्य तेनोच्यते यत् - स्वतः प्रवृत्त्यशक्तत्वाद् ईशावास्यमिदं जगत्। सर्वस्यापि

ईश्वराधीनप्रवृत्तित्वात् ईश्वरप्रदत्तेन एव वस्तुना भुञ्जीथाः, नान्यं प्रयाचयेत् इति। द्वैतवेदान्तिना जयतीर्थेन मध्वाचार्यकृतस्य भाष्यस्य स्पष्टीकरणाय किञ्चिद् विशदीकृतम्। तेनोच्यते - प्रकृत्यन्तर्भूतं कृत्स्नमिदं जगत् स्वतः प्रवृत्त्यशक्तत्वात् स्वतन्त्रेण ईशेन सर्वप्रवृत्तिकारणभूतेन एव भवितव्यम्।[5]

वेदान्तदर्शनस्य प्रधानसम्प्रदायत्रयस्य भाष्यम् उपरिष्टान्निगदितम्। सिद्धान्तभेदात् सम्प्रदायानां व्याख्यानभेदः भाष्येषु स्पष्टः। इदानीं प्रथममन्त्रम् आश्रित्य भाष्येषु यत्र मुख्यविरोधः परिलक्ष्यते तत् पर्यालोच्यते।

प्रथमतः 'ईशावास्यम्' अथवा 'ईशा वास्यम्' - इत्यत्र 'वास्यम्' अथवा 'आवास्यम्' इति। अद्वैतवेदान्तिना शङ्कराचार्येण विशिष्टाद्वैतवेदान्तिना वेङ्कटनाथेन च 'ईशा वास्यमि'ति पाठं स्वीचक्रुः। शङ्कराचार्येण 'वास्यमि'ति पदस्य 'आच्छादनीयम्' इत्यर्थं गृहीत्वा परमेश्वरेण कृत्स्नम् अनृतं वस्तुजातम् आच्छादनीयम् इत्यर्थः कृतः। परन्तु विशिष्टाद्वैतवेदान्तिना वेङ्कटनाथेन 'वास्यमि'ति पदस्य 'व्याप्यम्' 'वसनीयं' वेति द्विविधः अर्थः स्वीकृतः। द्वैतवेदान्तिना मध्वाचार्येण यद्यपि 'ईशावास्यम्' इति पाठं स्वीकृत्य "ईशस्य आवासयोग्यम्" इति वास्यपदस्य आवासयोग्यार्थः स्वीकृतः तथापि वेङ्कटनाथस्वीकृतेन अर्थेन सह तत्स्वीकृतस्य अर्थस्य विरोधो नास्ति।[6] "वस आच्छादने", "वस निवासे", "वास उपसेवायाम्" इति धातुत्रयम् विद्यते। एतेभ्यः त्रिभ्य एव धातुभ्यः ण्यत्प्रत्यये वास्यमिति रूपं सिद्ध्यति। उपसेवा उपसेवनम् उपभोगः इत्यर्थः। श्रीअरविन्देन वासः वसनम् परिधानम् इत्यर्थाद् वास्यमिति पदस्य परिधेयम् इत्यर्थः अपि स्वीकृतः।[7] वासः सुगन्धः इत्यस्माद् वासशब्दार्थाद् वास्यमिति पदस्य सुगन्धनीयम् इत्यर्थः अपि शक्यते स्वीकर्तुम्। पि. ठीम-महोदयेन आवास्यपदस्य अर्थपर्यालोचनवेलायाम् अयमर्थः निगदितः।[8] तेन च परमेश्वरेण सर्वं सुगन्धनीयम् अर्थात् परमेश्वरभावः सर्वेषु चराचरवस्तुषु आपादनीयः येन परमेश्वरस्य अस्तित्वं निखिलेषु वस्तुषु उपलभ्येत इत्यर्थः सम्भवति। परन्तु श्रीअरविन्दः ठीम-महोदयश्च आवासयोग्यम् इति अर्थं प्रसङ्गेऽस्मिन् समीचीनं मन्येते। इत्थं वास्यपदस्य बहवः अर्थाः सम्भवन्ति।

द्वितीयतः, "तेन त्यक्तेन भुञ्जीथाः" इति तृतीयः पादः। पादस्यास्य व्याख्यानवेलायां शङ्करभाष्ये उक्तम् - "तेन त्यक्तेन त्यागेनेत्यर्थः" "भुञ्जीथाः पालयेथाः" इति। तेन इति पदस्यार्थः शङ्करभाष्ये नैव स्पष्टतया निगदितम्। तेनेति पदस्य विशेषार्थानिरूपणात् पदमिदं त्यक्तेन इति पदस्य विशेषणमिति शङ्कराचार्यस्याशय इति ऊहितुं शक्यते। वेङ्कटनाथेन तु तेन इति पदस्य "जगता भोग्यताभ्रमविषयेण" इत्यर्थः स्वीकृतः। अत्र पूर्वोक्तं पदं हि जगत्। तस्मात् तेन इति पदं पूर्वोक्तं जगत् इति पदं परामृशति इति तस्याभिप्रायः। मध्वाचार्येण पुनः तेन इत्यस्य 'ईशेन' इत्यर्थः कृतः। वस्तुतः तच्छब्दः पूर्वोक्तं पदं किञ्चित् परामृशति। मध्वाचार्यमते तेन इति तृतीयान्तं पदं पूर्वोक्तेन ईशा इति तृतीयान्तेन पदेन अन्वेति। तस्मात् तेन इति पदं पूर्वोक्तम् ईशेन इति पदं निर्दिशति इति मध्वाचार्यस्याशयः। 'त्यक्तेन' इति पदस्य शङ्कराचार्यः 'त्यागेन' इति, वेङ्कटनाथः 'परित्यक्तेन' इति, मध्वाचार्यश्च 'दत्तेन' इत्यर्थं स्वीचक्रुः। त्यक्तम् इति पदं क्तप्रत्ययान्तत्वात् विशेषणम्। वेङ्कटनाथमते अत्र विशेष्यं हि पूर्वोक्तं 'तेन जगता' इति। तस्मात् परित्यक्तेन तेन जगता इत्यर्थः वेङ्कटनाथेन स्वीकृतः। मध्वाचार्यमते विशेषणभूतस्य त्यक्तेनेति पदस्य विशेष्यम् अस्मिन् मन्त्रे उल्लिखितं नास्ति। तस्मात् मध्वाचार्येण त्यक्तेन इत्यस्य दत्तेन वस्तुना इत्यर्थः स्वीकृतः। यद्यपि तदीयभाष्ये 'वस्तुना' इति पदं नास्ति तथापि अर्थतः तद् अवगम्यते। विवेकानन्दस्वामिनम् अनुसरता स्वामिना हर्षानन्देन 'तेने'ति पदस्य 'जगत्' इत्यर्थः स्वीकृतः। तथाहि हर्षानन्देनोच्यते - "यत् त्यक्तव्यं सा जगति स्थूलजगद्दृष्टेरेव न तु जगदेव। एष त्यागश्च जगति ईशावास्यत्वेन जगति ईश्वरदृष्टिकरणेन साधितव्यः" इति।[9] विवेकानन्देनोच्यते - "Thus we have to give up the world, and when the world is given up, what remains? God. What is meant? You can have your wife; it does not mean that you are to abandon her, but that you are to see God in the wife."[10]

किञ्च, शङ्कराचार्येण 'भुञ्जीथाः' इति पदस्य 'पालयेथाः' इत्यर्थः कृतः। वेङ्कटनाथेन यद्यपि स्पष्टतया 'भुञ्जीथाः' इत्यस्य अर्थः न निगदितः तथापि तन्मते 'भोगं कुर्याः' अथवा 'अनुभवेः' इत्यर्थः भाष्यदृष्ट्या युक्तः। मध्वाचार्यमतेऽपि 'भोगं कुर्याः' इत्यर्थः युक्ततामेति, न तु 'पालयेथाः' इति। "भुज पालनाभ्यवहारयोः" इति पालनार्थे भोजनार्थे च भुज्धातुः व्यवह्रियते। "भुजोऽनवने" इति पाणिनीयसूत्रनियमात् अपालने अर्थे अर्थाद् भोजनार्थे भुज्धातोः आत्मनेपदलकारप्रयोगः स्यात्। पालनार्थे तु परस्मैपदलकारप्रयोगः स्यात्। एतल्लौकिकनियममाश्रित्य मन्त्रे 'भुञ्जीथाः' इति आत्मनेपदप्रयोगस्य अर्थः स्यात् 'भक्षयेः' इति, न तु 'पालयेथाः'। यद्यपि "छन्दसि बहुलमि"ति नियमात् वेदे उक्तलौकिकनियमव्यतिक्रमो न दोषाय, तथापि स्वाभाविकस्य अर्थस्य अन्वये सति तद् अगृहीत्वा अन्यार्थस्य ग्रहणं गौरवदोषाय कल्पते। किञ्च, "छन्दसि बहुलमि"ति अगतिकगतिन्यायेन अवगन्तव्यम्। तस्मात् भुञ्जीथा इति पदस्य पालनार्थं विहाय 'भोगं कुर्याः' 'अनुभवेः' वा इत्यर्थस्वीकार एव युक्ततर इति मदीया मतिः। अधिकतया भाष्यकाराः भुञ्जीथाः इति पदस्यार्थं अनुभवेः अथवा भोगं कुर्याः इति स्वीकृतवन्तः, परन्तु नैके भाष्यकाराः पालनार्थमपि उररीकृतवन्तः। तथाहि - पि. ठीमः "should nourish" (पालयेथाः) इति, श्रीअरविन्दः "shouldst enjoy" (उपभोगं कुर्याः) इति, सिनिय-कोहेन "eat" (खादेः) इति, राधाकृष्णन् "find your enjoyment" (भोगम् अन्विष्येः) इति च स्वीकृतवन्तः। हर्षानन्दस्वामिना मूलतः 'अनुभवेः' इत्यर्थः स्वीकृतः, परन्तु 'पालयेथाः' इत्यर्थपरत्वेनापि पदस्यास्य व्याख्यानं तेन प्रदत्तम्।

इदानीं मुख्यवेदान्तसम्प्रदायत्रयकृतभाष्यं पर्यालोच्य प्रथममन्त्रस्यार्थनिर्णयाय मया प्रयत्यते-- ईशा सर्वनियन्त्रा परमेश्वरेण इदं परिदृश्यमानं ज्ञेयं यत्किञ्च यत्किमपि जगत्यां प्रपञ्चे जगत् परिवर्तनशीलं सर्वं कृत्स्नं भोक्तृभोग्यरूपं वस्तुजातम् आवास्यं वास्यं वा, आवसनीयं व्याप्यमित्यर्थः,[11] अर्थात् परमेश्वरः सर्वं चराचरवस्तुजातं व्याप्य विराजते इति निश्चिततया मनसि धारणीयं साधकैः। यदा सर्वमेव परमेश्वरेण व्याप्तमिति सुदृढं ज्ञानं भवति तदा तेन सर्ववस्तुषु परमेश्वरव्याप्तिहेतुना[12] त्यक्तेन वासनात्यागेन[13] भुञ्जीथाः भोगं कुर्यात् अनुभवेः आस्वादनं कुर्यादिति यावत्। कस्यस्विद् धनं कस्यापि धनं, मा गृधः न गृह्णीयात्, अथवा मा गृधः कुत्रापि गृधिम् आकाङ्क्षां लोभं वा न कुर्यात्, यतो हि कस्यस्विद् धनम्? धनं कस्य? धनं न कस्यापि अन्यस्य विद्यते, सर्वं परमेश्वरेण व्याप्यत्वात् धनं नाम न परमेश्वराद् अन्यत् किञ्चिद् विद्यते येन परकीयेषु वस्तुषु लोभः स्यात् इत्यर्थः। परमेश्वरेण सर्वं चराचरात्मकं वस्तुजातं वास्यमित्यस्य तात्पर्यं हि परमेश्वरः सर्वेषु वस्तुषु साक्षाद् विराजते, सर्वत्र निवासं करोति च। न हि प्रपञ्चस्थितं कृत्स्नं वस्तुजातं परमेश्वराद् आत्यन्तिकतया सम्बन्धरहितम्, अपि तु सर्वं वस्तु तस्यैव परमेश्वरस्य प्रकाशभूतम्। तस्मात् सर्वत्र परमेश्वरबुद्धिः कर्तव्या। सर्वत्र परमेश्वरबुद्धौ सत्यामेव वासनात्यागेन यथार्थतया परमेश्वरात्मकस्य प्रपञ्चस्य सम्यग् आस्वादनं कर्तुं शक्यते। तादृशस्थितावेव कस्यापि लोभो मोहो वा न भवतः।

एतादृश एवानुभवः श्रीरामकृष्णदर्शने विज्ञानिनो भवति। न हि विज्ञानी भोक्तृभोग्यात्मकं प्रपञ्चम् ईश्वरात् वास्तविकतया सम्बन्धरहितं मन्वानः तं परित्यज्यति, अपि तु ईश्वरमयं प्रपञ्चं पश्यन् प्रतिक्षणं मोमुद्यते। तथाहि उच्यते श्रीरामकृष्णेन - "संसारोऽयं प्रवञ्चनवेष्टनम् इति ज्ञानिनोक्तम्। यस्तु ज्ञानाज्ञाने अतिक्राम्यति तेनोच्यते 'आनन्दस्य गृहम्'। स पश्यति यत् ईश्वर एव जीवः जगत् चतुर्विंशतितत्त्वानि च भवति"।[14] भोगवासना अथवा कर्मफलवासना एव जीवानां बन्धं प्रति निदानम्। अज्ञाः वासनावशाद् भोगाय अर्थाद् विषयास्वादनाय प्रवर्तन्ते, किन्तु यथार्थतया आस्वादनं तदैव सम्भवति यदा वासनाः परित्यज्य निर्लिप्ततया आस्वादनं क्रियते। अतः सर्वेषु चराचरात्मकप्रपञ्चेषु परमेश्वरभावं निश्चिततया संस्थाप्य वासनासमूहं परित्यज्य विषयास्वादनाय प्रवर्त्यतां, जगद्रूपलीलाविलासो वा आस्वाद्यतां साधकैरिति मन्त्रस्यास्य अन्तर्निहितार्थः।

उपनिषद्व्याख्यानकाले उपनिषत् स्वतन्त्रतया किम् अभिप्रैतीति अनवलोक्य स्वमनोगतस्यार्थस्य आपादनेन अथवा स्वानुकूलसिद्धान्तानुसारेण कथञ्चित् अर्थसङ्गतिं साधयित्वा उपनिषद्व्याख्यानं नैव औचित्यमावहति। तस्माद् ऐदम्प्राथम्येन

वक्तव्यं यत् ईशा वास्यमिति ईशोपनिषदः प्रथममन्त्रव्याख्यानावसरे सर्वं प्रपञ्चजातं मिथ्याभूतम् अनृतमिति अद्वैतवेदान्तमतस्य स्वीकारः नैव यथार्थः। ईशोपनिषत् सर्वं प्रपञ्चं नामरूपत्वेन मिथ्याभूतत्वात् परित्याज्यमिति नैव उपदिशति, अपि तु सर्वेषु वस्तुषु परमेश्वरबुद्धिः कर्तव्येति उपदिशति। सर्वं चराचरात्मकं जगद् यदि अनृतमेव स्यात् तर्हि सर्वस्मिन् परमात्मभावः केन प्रकारेण स्यात्? परमेश्वरो यदि सर्वमेव वस्तु व्याप्नोति तर्हि नामरूपे अपि स व्याप्नोति, अर्थात् नामरूपयोरपि ईश्वरबुद्धिः कर्तव्या; परमेश्वरो यदि सर्ववस्तुषु वासं करोति, तर्हि नामरूपयोरपि वासं करोतीत्येव अङ्गीकरणीयम्। नहि नामरूपे परमेश्वरव्याप्तिरहिते। किञ्च, सर्वस्य वस्तुनः ईश्वरनियन्तृत्वं मन्त्रेऽस्मिन् द्योत्यते इति द्वैतवादिनां यः सिद्धान्तः तस्य यौक्तिकत्वेऽपि “ईश्वरप्रदत्तेन वस्तुना भोगः कर्तव्यः” इति द्वैतवेदान्तसम्मता या ईश्वरसमर्पणबुद्धिः मध्वाचार्येणात्र निगदिता सा प्रसङ्गेऽस्मिन् कष्टकल्पना। त्यक्तेन इति पदस्य दत्तेन इत्यर्थस्वीकारे सर्वस्यापि भोक्तृभोग्यरूपस्य प्रपञ्चस्य ईश्वरप्रदत्तत्वात् सर्वस्यापि प्रपञ्चस्यैव भोगः अत्रोपदिश्यते इति मन्तव्यम्, तत् नैव स्वीकर्तुं शक्यम् भोगवादापत्तेः। अपि च, विशिष्टाद्वैतिना वेङ्कटनाथेन यद्यपि मन्त्रस्यास्य निरपेक्षतया व्याख्यानाय चेष्टितं तथापि तदीयभाष्ये सम्प्रदायमतस्य आपादनम् अवलोक्यते। ईशेति पदस्यार्थनिर्णयावसरे तेनोच्यते “‘ज्ञाज्ञौ द्वावजावीशनीशा’-वित्यादिषु जीवादत्यन्तविलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेन” इति। जीवाद् अत्यन्तविलक्षणतया कुत्रचित् शास्त्रे प्रसिद्धस्य पुरुषोत्तमस्य उल्लेखः अत्र ईशोपनिषद्व्याख्यानप्रसङ्गे अप्रासङ्गिकः। इत्थं सर्वभाष्येषु एव स्वसम्प्रदायसिद्धान्तस्य आपादनम् अवलोक्यते। न हि ते स्वतन्त्रतया स्वसम्प्रदायसिद्धान्तव्यतिरेकेण उपनिषन्मन्त्रस्यास्य अर्थं निर्णीतवन्तः।

परन्तु यदि वयं व्याख्यानभेदरूपदोषान् परित्यज्य मन्त्रस्य साधारणम् अर्थं स्वीकुर्मस्तर्हि अवलोक्यते यत् मन्त्रेऽस्मिन् ईश्वरस्य कृत्स्नप्रपञ्चव्यापकता एव उपदिश्यते, अर्थात् जगद् दृष्ट्वा जगतः ईश्वरभिन्नत्वेन यो बोधः अस्माकं साधारणमानवानां भवति तं स्थूलबोधं परित्यज्य जगतः प्रतिवस्तु ईश्वरबोधः मन्त्रेणानेन उपदिश्यते। अपि च मन्त्रेऽस्मिन् जगद्भोगवासनात्यागपूर्वकः विषयभोगः उपदिश्यते, अन्यस्य वस्तुनि लोभश्च निषिध्यते। एतद्धि कर्मयोगस्य मूलम्। कर्मयोगो नाम निष्कामं कर्म, तद्धि वासनारहितमेव स्यात्। अस्यैव कर्मयोगस्य स्पष्टोल्लेखः ईशोपनिषदः द्वितीये मन्त्रे “कुर्वन्नेवेह कर्माणी”ति मन्त्रे अवलोक्यते, यद्धि श्रीमद्भगवद्गीतासु विस्तरेण निर्दिश्यते। एवं भाष्यकाराणां सम्प्रदायिकपक्षपातमूलकान् अंशान् विविच्य यदि वयम् उपनिषदं पर्यालोचयामस्तर्हि उपनिषन्मन्त्राणां रमणीयः अर्थः प्रकाशते इति अलं विस्तरेण।

---

## अन्त्यटीका

1 उपनिषद्भाषम् (खण्डः १), पृ. ४।

2 Vedanta Desika, *Isavasyopanishad Bhashya*, p. 1. तत्र भाष्यारम्भे वेङ्कटनाथेन अयं श्लोकः निगद्यते - ईशावास्यमिदं सर्वमित्यादि यदनूच्यते। शिष्यं प्रति गुरोरेतद्ब्रह्मविद्यानुशासनम्।।

3 तदेव, “तत्र प्रथमम् अचिद्विकाराधिष्ठितस्य स्वतन्त्रतात्मभ्रमादिपरिजिहीर्षया सर्वस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वमभिप्रेत्याह” (पृ.२) “मुमुक्षोरीश्वरपारतन्त्र्यबोधमुत्पाद्य वैराग्यभूषितां वृत्तिमुपदिशति” (पृ.४)।

4 शङ्कराचार्यादयः ईट् इति प्रातिपदिकं स्वीकृत्य तस्य तृतीयाविभक्त्यैकवचने ‘ईशा’ पाठं स्वीकुर्वन्ति, परन्तु मध्वाचार्यः ‘ईशेन’ ‘ईशस्य’ इत्यादिपदप्रयोगात् ईश इति अकारान्तं प्रादिपदिकं स्वीचकार इति अवधेयम्।

5 *श्रीभाष्यखण्डार्थसहितः ईशावास्योपनिषन्नामा प्रथमो मणिः*, पृ. ५।

6 Magnone-महोदयेनापि तस्य प्रबन्धे विषयोऽयम् आलोचितः। See, *Hermeneutical Wrigglings about the Īśopaniṣad*, p. 352.

7 Sri Aurobindo, *Isha Upanishad*, p.5. Here he says, “There are three possible senses of vāsyam, “to be clothed,” “to be worn as a garment” and “to be inhabited”.”

8 P. Theime, Īśopaniṣad (=Vājasaneyi-saṃhitā 40) 1-14, p. 89. There he says, "There are several possibilities worth to be considered: *ā-vāsya* may be derived (a) from *ā-vas* 'put on as clothing' (pres. *-vaste*), or (b) from *āvāsya-* 'pervade by odor, perfume,' or (c) *ā-vas* 'dwell in' (pres. *-vasati),* constructed with acc."

9 Swami Harshananda, *Īśāvāsyopaniṣat: with the commentary Vivekasukhavardhinī*, p. 33.

10 *The Complete Works of Swami Vivekananda* (Vol.2), pp. 144-154.

11 मन्मते वास्यमिति पदस्य आच्छादनीयम्, निवसनीयम्, परिधेयम्, सुगन्धनीयम्, उपभोक्तव्यं चेति पञ्चसु अर्थेषु आच्छादनीयम्, निवसनीयम्, सुगन्धनीयम् इति अर्थत्रयस्य व्यापकत्वे तात्पर्यम्। परिधेयार्थः उपभोगार्थश्च प्रसङ्गेऽस्मिन् अयुक्तः। आच्छादनीयम् इति पदार्थप्रसङ्गे इदं वक्तव्यं यद् यथा वस्त्रेण किञ्चिद् वस्तु आच्छाद्यते चेत् तद् वस्त्रं कृत्स्नं वस्तु व्याप्य तिष्ठति, तद्वत् परमेश्वेण जगत् आच्छादनीयम् इत्यस्य तात्पर्यं परमेश्वरः जगत् परिव्याप्य तिष्ठति इति। शङ्करभगवत्पादः यथा आच्छादनीयमिति पदस्य गोपनीयम् (hiding) इत्यर्थम् स्वीकृतवान्, न तथा अत्रेति अवधेयम्।

12 'तेन' इति पदस्यार्थः जगता इति वेङ्कटनाथादिभिः आचार्यैः यत् प्रतिपादितं तन्नैव असङ्गतम्। परन्तु मन्मते तेनेति पदस्य हेत्वर्थः प्रसङ्गेऽस्मिन् युक्ततरः। ठीम-महोदयेन, सर्वेपल्लि-राधाकृष्णन् -महोदयेन च हेत्वर्थः एव समादृतः।

13 त्यक्तेन इत्यस्य वासनात्यागेन इत्यर्थप्रसङ्गे इदं वक्तव्यं यत् मन्त्रस्यास्य चतुर्थपादेन लोभत्यागाय उपदिश्यते, लोभस्य मूलं हि वासना। किञ्च, प्रथमद्वितीयपादाभ्यां कृत्स्नस्य प्रपञ्चस्य ईश्वरव्याप्तिः उपदिश्यते। एकेनैव ईश्वरेण सर्वावास्यत्वाद् वासनात्यागेनैव तस्यास्वादनं शक्यसम्भवमिति कारणाद् वासनापदस्यात्र निवेशः आवश्यकः।

14 *श्रीश्रीरामकृष्णकथामृत*, पृ. ५३४। *" एइ संसार धोँकार टाटि – ज्ञानी वलेछेन। यिनि ज्ञान अज्ञानेर पार, तिनि वलेछेन 'मजार कुटि!' से देखे ईश्वरइ जीव, जगत्, एइ चतुर्विंशति तत्त्व सव हयेछेन।"*

## परिशीलिताः ग्रन्थाः प्रबन्धाश्च


हर्षानन्दपुरी, स्वामी, *विवेकसुखवर्धिनी व्याख्यासहिता ईशावास्योपनिषद्*, रामकृष्ण मठ: बेङ्गलुरु, १९९७।

उपनिषद्भाष्यम् (खण्डः १), सम्पा.- एस्, सुब्रह्मण्यशास्त्री, वाराणसी: दक्षिणामूर्ति-मठ-प्रकाशन, २०११।

*श्रीभाष्यखण्डार्थसहितः ईशावास्योपनिषन्नामा प्रथमो मणिः*, प्रकाशकः- हे. कृ. रङ्गनाथाचार्यः, वेङ्गलुरु।

*श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीतभाष्यभूषिता ईशावास्योपनिषत् तथा तलवकारोपनिषत्: टीका-टिप्पणी-खण्डार्थसंवलिता*, सम्पा. रङ्गनाथ कट्टिः, बेङ्गलूरु: पूर्णप्रज्ञसंशोधनमन्दिरम्, २०१६।

श्रीम. *श्रीश्रीरामकृष्णकथामृत* (अखण्ड). कलकाता: उद्बोधन कार्यालय, १९८७।

Aurobindo, Sri. *The Upanishads-I, Isha Upanishad*. Pondicherry: Sri Aurobindo Ashram, 2003.

Chatterjee, S. C. *Classical Indian Philosophies: Their Synthesis in the Philosophy of Sri Ramakrishna*. Calcutta: University of Calcutta, 1963.

Chari, S. M. Srinivasa. *The Philosophy of the Upaniṣads*, New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 2002.

Cohen, Signe. *The Upanishads: A Complete Guide,* Routledge: New York, 2018.

Deshika, Sri Vedanta. *Isavasyopanishad Bhashya*, Eds. K. C. Baradachari & D. T. Thathacharya, Madras: Vedanta Deshika Research Society, 1975.

Magnone, Paolo. "*Aho kauśalam apūrvam*. Hermeneutical wrigglings about the *Īśôpaniṣad*", *World View and Theory in Indian Philosophy*, Ed. Piotr Balcerowicz, Warsaw Indological Studies 5 (2012), pp.349-365

Harshananda, Swami. *Īśāvāsyopaniṣat: with the commentary Vivekasukhavardhinī*, Ramakrishna Math: Bangalore, 2013.

Maharaj, Ayon.

Radhakrishnan, S. *The Principal Upaniṣads.* London: George Allen & Unwin Ltd. 1968.

*The Complete Works of Swami Vivekananda*, Vol.2, Advaita Ashrama, Kolkata: 2002

Theime, P. "Īśopaniṣad (=Vājasaneyi-saṃhitā 40) 1-14," *Journal of the American Oriental Society* 85.1 (Jan.-Mar., 1965): 89-99.